श्री कृष्ण स्तोत्रं (इंद्र कृतं)

श्री कृष्ण स्तोत्रं (इंद्र कृतं)

अक्षरं परमं ब्रह्म ज्योतीरूपं सनातनं |
गुणातीतं निराकारं स्वेच्छामयमनंतकं || 1 ||

भक्तध्यानाय सेवायै नानारूपधरं वरं |
शुक्लरक्तपीतश्यामं युगानुक्रमणेन च || 2 ||

शुक्लतेजः स्वरूपं च सत्ये सत्यस्वरूपिणं |
त्रेतायां कुंकुमाकारं ज्वलंतं ब्रह्मतेजसा || 3 ||

द्वापरे पीतवर्णं च शोभितं पीतवाससा |
कृष्णवर्णं कलौ कृष्णं परिपूर्णतमं प्रभुं || 4 ||

नवधाराधरोत्कृष्टश्यामसुंदरविग्रहं |
नंदैकनंदनं वंदे यशोदानंदनं प्रभुं || 5 ||

गोपिकाचेतनहरं राधाप्राणाधिकं परं |
विनोदमुरळीशब्दं कुर्वंतं कौतुकेन च || 6 ||

रूपेणाप्रतिमेनैव रत्नभूषणभूषितं |
कंदर्पकोटिसौंदर्यं बिभ्रतं शांतमीश्वरं || 7 ||

क्रीडंतं राधया सार्धं बृंदारण्ये च कुत्रचित् |
कुत्रचिन्निर्जनेऽरण्ये राधावक्षः स्थलस्थितं || 8 ||

जलक्रीडां प्रकुर्वंतं राधया सह कुत्रचित् |
राधिकाकबरीभारं कुर्वंतं कुत्रचिद्वने || 9 ||

कुत्रचिद्राधिकापादे दत्तवंतमलक्तकं |
राधाचर्चिततांबूलं गृह्णंतं कुत्रचिन्मुदा || 10 ||

पश्यंतं कुत्रचिद्राधां पश्यंतीं वक्रचक्षुषा |
दत्तवंतं च राधायै कृत्वा मालां च कुत्रचित् || 11 ||

कुत्रचिद्राधया सार्धं गच्छंतं रासमंडलं |
राधादत्तां गळे मालां धृतवंतं च कुत्रचित् || 12 ||

सार्धं गोपालिकाभिश्च विहरंतं च कुत्रचित् |
राधां गृहीत्वा गच्छंतं विहाय तां च कुत्रचित् || 13 ||

विप्रपत्नीदत्तमन्नं भुक्तवंतं च कुत्रचित् |
भुक्तवंतं ताळफलं बालकैः सह कुत्रचित् || 14 ||

वस्त्रं गोपालिकानां च हरंतं कुत्रचिन्मुदा |
गवां गणं व्याहरंतं कुत्रचिद्बालकैः सह || 15 ||

काळीयमूर्ध्नि पादाब्जं दत्तवंतं च कुत्रचित् |
विनोदमुरळीशब्दं कुर्वंतं कुत्रचिन्मुदा || 16 ||

गायंतं रम्यसंगीतं कुत्रचिद्बालकैः सह |
स्तुत्वा शक्रः स्तवेंद्रेण प्रणनाम हरिं भिया || 17 ||

पुरा दत्तेन गुरुणा रणे वृत्रासुरेण च |
कृष्णेन दत्तं कृपया ब्रह्मणे च तपस्यते || 18 ||

एकादशाक्षरो मंत्रः कवचं सर्वलक्षणं |
दत्तमेतत् कुमाराय पुष्करे ब्रह्मणा पुरा || 19 ||

कुमारोऽंगिरसे दत्तं गुरवेऽंगिरसां मुने |
इदमिंद्रकृतं स्तोत्रं नित्यं भक्त्या च यः पठेत् || 20 ||

स हि प्राप्य दृढां भक्तिमंते दास्यं लभेद्ध्रुवं |
जन्ममृत्युजराव्याधिशोकेभ्यो मुच्यते नरः |
न हि पश्यति स्वप्नेऽपि यमदूतं यमालयं || 21 ||

इति श्रीब्रह्मवैवर्ते महापुराणे श्रीकृष्णजन्मखंडे एकविंशोऽध्याये इंद्रकृत श्री कृष्ण स्तोत्रं |